✧˖°*❋ ❋*°˖✧

# नीलसरस्वती स्तोत्रम् – मंत्र
# (Neel Saraswati Stotram)

✧˖°*❋ ❋*°˖✧

# नीलसरस्वती स्तोत्रम्

घोर-रूपे महा-रावे
सर्व शत्रु भयङ्करि ।
भक्तेभ्यो वरदे देवि
त्राहि मां शरणागतम् ॥१॥

ॐ सुर-सुरार्चिते देवि
सिद्ध-गन्धर्व-सेविते ।
जाड्य-पाप-हरे देवि
त्राहि मां शरणागतम् ॥२॥

जटा-जूट-समा-युक्ते
लोल-जिह्वान्त-कारिणि ।
द्रुत-बुद्धि-करे देवि
त्राहि मां शरणागतम् ॥३॥

सौम्य-क्रोध-धरे रूपे
चण्ड-रूपे नमोऽस्तु ते ।
सृष्टि-रूपे नमस्तुभ्यं
त्राहि मां शरणागतम् ॥४॥

जडानां जडतां हन्ति
भक्तानां भक्त वत्सला ।
मूढतां हर मे देवि
त्राहि मां शरणागतम् ॥५॥

वं हूं हूं कामये देवि
बलि-होम-प्रिये नमः ।
उग्र तारे नमो नित्यं
त्राहि मां शरणागतम्॥६॥

बुद्धिं देहि यशो देहि
कवित्वं देहि देहि मे ।
मूढत्वं च हरेद्-देवि
त्राहि मां शरणागतम् ॥७॥

इन्द्रादि-विलसद्-द्वन्द्व-
वन्दिते करुणा मयि ।
तारे तारा-धिना-थास्ये
त्राहि मां शरणागतम् ॥८॥

अष्टम्यां च चतुर्दश्यां
नवम्यां यः पठेन्-नरः ।
षण्मासैः सिद्धि-माप्नोति
नात्र कार्या विचारणा ॥९॥

मोक्षार्थी लभते मोक्षं
धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां
तर्क-व्याकरणा-दिकम् ॥१०॥

इदं स्तोत्रं पठेद् यस्तु
सततं श्रद्धया-ऽन्वितः ।
तस्य शत्रुः क्षयं याति
महा-प्रज्ञा प्रजायते ॥११॥

पीडायां वापि संग्रामे
जाड्ये दाने तथा भये ।
य इदं पठति स्तोत्रं
शुभं तस्य न संशयः ॥१२॥

इति प्रणम्य स्तुत्वा च
योनि-मुद्रां प्रदर्शयेत् ॥१३॥

**॥ इति नीलसरस्वतीस्तोत्रं सम्पूर्णम् ॥**

≪ ▪ ◦ ❈ ◦ ▪ ≫

# Neel Saraswati Stotram in English

Ghora-rūpe Mahā-rāve
Sarva śatru bhayaṅkari |
Bhaktebhyo varade Devi
Trāhi māṁ śaraṇāgatam ||1||

Oṁ sura-surārcite Devi
Siddha-gandharva-sevite |
Jāḍya-pāpa-hare Devi
Trāhi māṁ śaraṇāgatam ||2||

Jaṭā-jūṭa-samā-yukte
Lola-jihvānta-kāriṇi |
Druṭa-buddhi-kare Devi
Trāhi māṁ śaraṇāgatam ||3||

Saumya-krodha-dhare rūpe
Chaṇḍa-rūpe namo'stu te |
Sṛṣṭi-rūpe namastubhyaṁ
Trāhi māṁ śaraṇāgatam ||4||

Jaḍānāṁ jaḍatāṁ hanti
Bhaktānāṁ bhakta vatsalā |
Mūḍhatāṁ hara me Devi
Trāhi māṁ śaraṇāgatam ||5||

Vaṁ hrūṁ hrūṁ kāmaye Devi
Bali-homa-priye namaḥ |
Ugra tāre namo nityaṁ
Trāhi māṁ śaraṇāgatam ||6||

Buddhiṁ dehi yaśo dehi
Kavitvaṁ dehi dehi me |
Mūḍhatvaṁ cha hared-devi
Trāhi māṁ śaraṇāgatam ||7||

Indrādi-vilasaddvandva-
Vandite karuṇā mayi |
Tāre tārā-dhināthāsye
Trāhi māṁ śaraṇāgatam ||8||

Aṣṭamyāṁ cha caturdaśyāṁ
Navamyāṁ yaḥ pate-naraḥ |
Ṣaṇmāsaiḥ siddhi-māpnoti
Nātra kāryā vicāraṇā ||9||

Mokṣārthī labhate mokṣaṁ
Dhanārthī labhate dhanam |
Vidyārthī labhate vidyāṁ
Tarka-vyākaraṇā-dikam ||10||

Idaṁ stotraṁ pateḍ yastu
Satataṁ śraddhayā-anvitaḥ |
Tasya śatruḥ kṣayaṁ yāti
Mahā-prajñā prajāyate ||11||

Pīḍāyāṁ vāpi saṁgrāme
Jāḍye dāne tathā bhaye |
Ya idaṁ pataṭi stotraṁ
śubhaṁ tasya na saṁśayaḥ ||12||

Iti praṇamya stutvā cha
Yoni-mudrāṁ pradarśayet ||13||

**॥ Iti Nīlasarasvatīstotraṁ Sampūrṇam ॥**

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧